National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(22): 30-32
© 2019 NJHSR
www.sanskritarticle.com

**डा. सतीशः के. एस्.**
सहायकाचार्यः,अद्वैतवेदान्तविभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विद्यापीठम्,नवदेहली -110016

# अद्वैततवेदान्तरीत्या शब्दशक्तिविचारः

**डा. सतीशः के. एस्.**

अद्वैतवेदान्ते षट्प्रमाणेषु शब्दोऽपि अन्यतमं प्रमाणम् । तत्र शाब्दज्ञानकरणं शब्दप्रमाणम्। शाब्दज्ञानन्तु पदज्ञानत्वेन पदज्ञानजन्यं तात्पर्यज्ञानत्वेन तात्पर्यज्ञानजन्यं वा तात्पर्यज्ञानकारणत्वं वा[1] । तत्करणं शब्दप्रमाणं नाम मानान्तरा - बाधिततात्पर्यविषयीभूतपदार्थसंसर्गबोधकं वाक्यम्।[2] इदं लक्षणं शब्दनित्यत्वानित्यत्व-वादिनां सर्वेषामनुगतम् । लक्षणे वाक्यपदादाने शब्दसमानार्थके प्रमाणान्तरेऽतिव्याप्तिः स्यात् । अतस्तद्विशेषणम् । अयोग्यस्यापि वह्निना सिञ्चेदिति वाक्यस्य पदार्थ-संसर्गबोधकवाक्यत्वात्तत्रातिव्याप्तिपरिहारायाबाधितेति संसर्गविशेषणममुपात्तम् । वह्निना सिञ्चेदिति वाक्यस्य बाधितसंसर्गकत्वात् । किन्तु सर्वमपि ब्रह्मभिन्नं द्वैतं ब्रह्मप्रमया बाधितमिति[3] कृत्वा लक्षणस्य ब्रह्मपरवाक्यातिरिक्तविषयकवाक्येष्वव्याप्तिपरिहाराय मानान्तरेणेत्युक्तम्। मानान्तरत्वमत्र सजातीयमानान्तरत्वं विवक्षितम् । तथा च पारमार्थिकतत्त्वावेदकैर्वेदान्तवाक्यैः सर्वबाधेऽपि व्यावहारि-कतत्त्वावेदकैः प्रमाणा-न्तरैर्बाधो न भवति । एवमेवार्थवादवाक्येषु **स प्रजापतिरात्मनो वपामुदखिदत्** इत्यादिषु श्रूयमाणपदार्थसंसर्गस्य व्यवहारदशायां बाधात्तत्राव्याप्तिपरिहाराय तात्पर्यविषयमित्युक्तम् । पूर्वोक्तार्थवादवाक्यस्य स्वार्थे तात्पर्याभावात्। एवञ्चेदं लक्षणं घटमानयेत्यादिषु सर्वत्र निर्दुष्टमेव ।

**वाक्यजन्यज्ञाने कारणानि**

वाक्यजन्यज्ञानेऽऽकाङ्क्षायोग्यताऽऽसत्तयस्तात्पर्यज्ञानं चेति कारणचतुष्टयम्।[4] आकाङ्क्षा नाम परस्परजिज्ञासाविषयत्वयोग्यत्वम् । क्रियाश्रवणे कारकस्य जिज्ञासा-विषयत्वम् । कारकश्रवणे क्रियाया जिज्ञासाविषयत्वम् । करणश्रवणे चेतिकर्तव्यताया जिज्ञासाविषयत्वम् ।
जिज्ञासाविषयत्वमात्रं नाकाङ्क्षा । तथा सत्यजिज्ञासोर्वाक्यश्रवणे तदर्थबोधो न स्यात् । अतो लक्षणे तद्योग्यत्वमुपात्तम् । योग्यत्वावच्छेदकं च क्रियात्वकारकत्वादिकम् ।

नीलो घट इत्यादिवाक्येषु सिद्धार्थपरेषु जिज्ञासाविषयत्वयोग्यत्वावच्छेदकानां क्रियाकर्मकरणेतिकर्तव्यतानामभावात्तत्राव्याप्तिरिति न शङ्कनीयम् । तत्राभेदान्वय-परवाक्येषु समानविभक्तिपदप्रतिपाद्यत्वं योग्यत्वावच्छेदकम् । ततश्च नाव्याप्तिः ।

योग्यता च वाक्यजन्यज्ञाने द्वितीयकारणरूपा तात्पर्यविषयसंसर्गाबाधः।[5] वह्निना सिञ्चेदित्यत्र तादृशसंसर्गो बाधित इति तदप्रमाणम् । इयं योग्यता न स्वरूपसती हेतुः। तथा सति शाब्दभ्रम एव न स्यात् । किन्तु सा ज्ञायमानैव कारणम् । तज्ज्ञानं च संशयनिश्चयसाधारणं कारणम् । आसत्तिश्चाव्यववधानेन पदजन्यपदार्थोपस्थितिः।[6] पदज्ञानजन्यान्वयप्रतियोग्युपस्थितिरासत्तिरिति भावः। अन्यथा संस्कारोपस्थितं तीरमादाय घोषादिपदैरेवान्वयबोधसम्भवे लक्षणैवाप्रसिद्धा स्यात् । अत एव द्वारमित्यादौ पिधेहीत्यादिपदाध्याहारः।

तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्।[7] स्वार्थसंसर्गानुभवजननस्वरूपयोग्यत्व - मित्यर्थः । इदं तात्पर्यज्ञानं न केवलं शाब्दज्ञानोपयोगि । किन्तु व्यवहारोपयोग्यपि च । गेहे घट इति वाक्यं गेहे घटसंसर्गप्रतीतिजननयोग्यं न तु पटसंसर्गप्रतीतिजनन-योग्यमिति तद्वाक्यं घटसंसर्गपरमिति

**Correspondence:**
**डा. सतीशः के. एस्.**
सहायकाचार्यः,अद्वैतवेदान्तविभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विद्यापीठम्,नवदेहली -110016

व्यपदिश्यते।अत्र तात्पर्यलक्षणे तत्प्रतीतिजनकत्वे सति तदन्यप्रतीतीच्छयानुच्चरितत्वमपि विवक्षितम् । तथा च लवणानयनेच्छयोच्चारि-तस्यसैन्धवमानयेति वाक्यस्याश्वानयनप्रतीतिजनकत्वयोग्यत्वेऽप्यश्वानयनेच्छानु-च्चारितत्वात्तत्र न तात्पर्यापत्तिः। अत्र तत्प्रतीतिजनन-योग्यत्वस्यावच्छेदिका शक्तिः । अद्वैते सर्वत्र कारणताया अवच्छेदिका शक्तिरेव।[8] तच्च तात्पर्यं लोके प्रकरणादिलिङ्ग-कानुमानेन प्रत्यक्षादिना वावधार्यते।

तदुक्तम् –

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।**
**सामर्थ्यमौचितीदेशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।**[9] इति

**पदार्थभेदः**

पदार्थो द्विविधः - शक्यो लक्ष्यश्च।[10] गौणीवृत्तेर्लक्षितलक्षणाया-मेवान्तर्भावात्। शक्तिविषयत्वं शक्यत्वम् । शक्तिश्च पदानामर्थेषु मुख्या वृत्तिः । तथा च वृत्तित्वे सति पदपदार्थमात्रनिरूप्यत्वं शक्तित्वमिति भावः। न तु शक्तिः सङ्केतः यश्चेश्वरेच्छा इदं पदममुमर्थं बोधयत्वित्येवं रूपेति न्यायमतोक्तं स्वीक्रियते । अतः घटपदस्य पृथुबुध्नोदराद्याकृतिविशिष्टे वस्तुविशेषे वृत्तिः। शक्तिश्चास्मिन् मते पदार्थान्तरम् । तस्यां शक्तौ वह्न्यादेर्दाहादिलक्षणकार्यानुपपत्तिः प्रमाणम् । किञ्च,

**न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।**
**परास्यशक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।।**[11]

इति श्रुतिरत्र प्रमाणम् ।

अपि च **सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिरि**[12] ति स्मृतिरपि प्रमाणम् । चित्सुखाचार्यैरपि **चोक्तम् – परास्य शक्तिर्विविधा सर्गाद्या भावशक्तयः** इति। ज्ञायमानशक्तिविषयत्वमेव शक्यत्वम् । सा च शक्तिस्तत्तत्पद-जन्यपदार्थज्ञानरूपकार्यानुमेया।

अद्वैते जातौ शक्तिर्न व्यक्तौ । व्यक्तीनामानन्त्येन गुरुत्वात्। यया संविदा घटवृत्तिघटत्वं गृह्यते तयैव घटस्यापि ग्रहणमिति व्यक्तिसमानसंवित्संवेद्यतया जातेर्ग्रहणात्, जातिव्यक्त्योस्तादा-त्म्यस्वीकाराच्च घटादिपदाद्व्यक्तिग्रहणे नानुपपत्तिः । अथवा नास्त्यत्राग्रहः । व्यक्तावपि शक्तिरङ्गीक्रियते । किन्त्वयं भेदो यद्व्यक्तौ स्वरूपसती पदानां शक्तिर्जातौ तु ज्ञाता सती । शक्तेः स्वरूपे महान् मतभेदोऽस्ति न्यायाद्वैतयोः । न्यायमते पदपदार्थसम्बन्धः शक्तिरस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छेच्छामात्रं वेति[13] निरुक्तम् । अद्वैतवेदान्ते तु वृत्तित्वे सति पदपदार्थमात्रनिरूप्यत्वं शक्तित्वमिति[14] निरुक्तम् । न्यायमते सा इच्छारूपा न पदार्थान्तरमद्वैतवेदान्ते तु तस्याः पदार्थान्तरत्वम[15] ङ्गीकृतम् । सर्वत्र कारणे कार्यानुकूलशक्तेः पदार्थान्तरत्वमद्वैते स्वीकृतम् ।

शक्तेरतिरिक्तपदार्थत्वं नैयायिकैर्निराकृतम्। शक्तेरतिरिक्तपदार्थ-त्ववादिभि-र्वह्नेर्दाहशक्तिरुदाह्रियते स्वमतसाधनाय । तथा हि – चन्द्रकान्तमण्यादिसंयुक्तेन्धनदीप्ते वह्नौ सत्यपि दाहो न जायते । अतः शक्तिविशिष्टवह्निरेव दाहं प्रति कारणम् । मण्यादिना च वह्निनिष्ठा दाहानुकूला शक्तिर्नश्यत इति कल्प्यते – मणिर्दाहानुकूलशक्तिनाशको दाहानुत्पत्तिकारणत्वादिति । मण्याद्यपसारणेनोत्तेजकेन सूर्यकान्तमण्यादिना वा दाहो जायते। तत्र दाहो नाम रूपान्तरोत्पत्तिः पूर्वरूपनाशो वा । प्रतिबन्धकत्वं नाम कार्यानुकूलधर्मविघटकत्वम् । उत्तेजकत्वं नाम प्रतिबन्धकसमवधानकालीन-कार्यजनकत्वम् । एवं सिद्धा शक्तिर्न द्रव्यगुणकर्मान्तर्भूता गुणवृत्तित्वात् । कपालरूपादौ घटरूपादिजननशक्तिदर्शनात् । एवमेव न सामान्यविशेषान्तर्भूता – उत्पत्ति-विनाशशालित्वात् । नाप्यभावान्तर्भूता भावत्वेन प्रतीयमानत्वात् । अतः शक्तिरतिरिक्तः पदार्थ इति ।

नैयायिका एवमस्य समाधानं यच्छन्ति – मण्यभावविशिष्टवह्नेरेव दाहकारण - त्वाङ्गीकारेण मणिसमवधानकाले दाहवारणोपपत्तावतिरिक्तशक्तिकल्पना न युक्ता । एवञ्च प्रतिबन्धकाभावस्य कारणत्वाङ्गीकारान्न शक्तिकल्पना युक्ता । अयञ्च प्रतिबन्धकाभावस्त्रेधा- उत्तेजकस्य प्रतिबन्धकमण्यादेर्द्वयोः सत्त्वे विशेष्यसत्त्वेऽपि विशेषणाभावाद्विशिष्टाभाव, उत्तेजकसत्त्वे मणेरभावे चोभयाभावाद्विशिष्टाभाव इति । तार्किकमते कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वम् । उत्तेजकत्वञ्च कारणताव - च्छेदकीभूताभावप्रतियोगित्वमिति बोध्यम् । किञ्चानेकशक्तितत्प्रागभावादिकल्पनायां गौरवमपि स्यात् ।

किन्त्वभावस्य कारणत्वमनिर्वचनीयवादिभिरद्वैतवेदान्तिभिर्न स्वीक्रियते । असत्कार्यवादोऽस्माभिरप्यग्रे निराकरिष्यते । तस्मात् शक्तिरतिरिक्ता स्वीकार्या एव । अनुमानमपि – **वह्निरद्विष्ठातीन्द्रियस्थितिस्थापकेतरभावाश्रयो गुणित्वात् घटव-दि**[16] ति शक्तौ प्रमाणम् । अपि च, **न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च**[17] इति, **सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्ति**[18] रिति श्रुतिस्मृती नैसर्गिकीं शक्तिं प्रमाणयतः । तस्मात् कार्यानुकूला शक्तिः सर्वत्र कारणेष्वास्थेया । प्रकृते शब्देऽपि तत्तत्पदजन्यपदार्थज्ञानरूपकार्येणानुमेया – **पदार्थज्ञानं पदनिष्ठ-स्वानुकूलशक्तिपूर्वकं पदजन्यपदार्थज्ञानरूप- कार्यत्वात् व्यतिरेके घटवदि**[19] ति । तस्मात् शक्तिर्नेश्वरेच्छारूपेच्छारूपा वा,अपि तु पदार्थान्तरमिति सिद्धम्।

जातौ शक्तिरुत व्यक्तावथवा जातिविशिष्टव्यक्तावित्यत्रापि न्यायाद्वैतवेदान्तयोर्मतभेदोऽस्ति । नैयायिकानां मते जातिविशिष्टव्यक्तौ शक्तिः । अद्वैतमते तु जातावेव शक्तिः स्वीकृता । जातिशक्तिमते गोशब्दस्य गोत्वे शक्तिरिति स्यात् । शक्यतावच्छेदकं गोत्वत्वम् । तच्च गवेतरासमवेतत्वे सतिसकलगोसमवेतत्वम् । तथा च सकलगोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशेन मीमांसकमते महद्गौरवम् । तर्कमते तु

शक्तिग्रहे गोत्वस्य स्वरूपतः प्रकारत्वेन न सकलगोव्यक्तिभानावश्यकता। तस्मात्तत्तज्जात्याकृतिविशिष्टत-त्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति नैयायिकानां वादः।[20]

अद्वैतिनान्तु जातावेव शक्तिः।[21] तेषामयमाशयः। जातिविशिष्टव्यक्तौ शक्तिस्वीकारे नागृहीतविशेषणाबुद्धिर्विशेष्य-मधिगच्छतीति न्यायाज्जातौ शक्तिग्रह-स्यावश्यकतया जातावेव शक्तिः स्याल्लाघवात् । न तु जातिविशिष्टव्यक्तौ । तदुक्तं – **विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषण** इति। व्यक्तिविशेष्यकजाति-प्रकारकशाब्दबोधे जातिविषयकशक्तिज्ञान-स्य हेतुत्वात्तस्यैव शक्तिवषयत्वस्वीकारे लाघवं स्यात्। व्यक्तिभानं तु लक्षणया । यथा – नीलो घट इत्यत्र न्यायमते नीलशब्दस्य नीलगुणविशिष्टे लक्षणा, एवमेव जातिवाचकस्य गवादिशब्दस्य **तद्विशिष्टे व्यक्तिविशेषे लक्षणे**[22] ति।

अयमत्र कश्चन विशेषो बोध्यः - अद्वैतमते जातिर्निरस्ता। जातिमनभ्युपगच्छद्भिरद्वैतिभिः कथं जातौ शक्तिरिति स्वव्याघातकमुच्यत इति संशयः स्यात् । अस्य संशयस्य निवारणं प्रो.पारसनाथद्विवेदीमहोदयैः स्वकीयायां वेदान्तपरिभाषाटिप्प-ण्यां सम्यक्कृतम्। तथाहि –

**प्रख्याविशेषाज्जातिसिद्धिः । प्रख्यायतेऽनयेति प्रख्या बुद्धिः । तस्या अविशेषादेकरूपत्वात्तद्विषयस्याप्येकरूपत्वम् । गुणप्रमाणादिभिन्नेष्वपि गोपिण्डे-ष्वयं गौरियं गौरिति एकाकारप्रत्ययोदयादवश्यमेव तादृशप्रतीतिकारणेनैकेन सामान्येन विषयेण भवितव्यमिति तत्त्वेकं गौत्वमिति च सिद्ध्यति ।**

**लाघवात्तत्रैव शक्तिकल्पनं न्याय्यम् । गोत्वाश्वत्वे सामान्यमिति व्यावृत्तेष्वनुवृत्तप्रत्ययवशात् सामान्यानामपि सामान्यमाश्रयितव्यम् । न चानवस्था, प्रख्याविशेषाभावात् । अभावेष्वपि निरूपाख्यत्वं सामान्यं कल्पनीयम् । न च सिद्धान्ते जातिः खण्डिता, अपि तु नित्यत्वसमवायत्वघटितं तल्लक्षणं खण्ड-तम्** ।[23] तस्मात् जातावेव शक्तिरद्वैतनये।

**पादटिप्पणयः**

1.वेदान्तपरिभाषा- शिखामणिः- पृष्ठसंख्या-260

2.वेदान्तपरिभाषा- शिखामणिः- पृष्ठसंख्या - 259

3.नेह नानास्ति किञ्चनेति श्रुतेः

4.वेदान्तपरिभाषा- शिखामणिः- पृष्ठसंख्या-261

5.वेदान्तपरिभाषा- शिखामणिः- पृष्ठसंख्या-279

6.वेदान्तपरिभाषा- शिखामणिः- पृष्ठसंख्या- 280

7.वेदान्तपरिभाषा- शिखामणिः- पृष्ठसंख्या- 311

8.वाक्यनिष्ठवाक्यार्थज्ञानकारणता किञ्चिदवच्छेद्या कारणातात्वात् वह्निनिष्ठदाहकारणतावदित्यनुमानं शक्तौ मानम्- वेदान्तपरिभाषा-शिखामणिः- पृष्ठसंख्या-314

9.वाक्यपदीयम्

10.वेदान्तपरिभाषा-शिखामणिः- पृष्ठसंख्या - 287

11.श्वेताश्वतरोपनिषत् , 6/8

12.वायुपुराणम्- 12/31

13.न्यायसिद्धान्तमुक्तावलिः – पृष्ठसंख्या- 358

14.मणिप्रभा पृष्ठसंख्या- 287

15.सा च शक्तिः पदार्थान्तरम् – वेदान्तपरिभाषा- पृष्ठसंख्या - 288

16.शिखामणिः पृष्ठसंख्या - 289

17.श्वेताश्वतरोपनिषत् – 6/8

18.वायुपुराणम् – 12/31

19.मणिप्रभा – पृष्ठसंख्या- 290

20.न्यायसिद्धान्तमुक्तावलिः पृष्ठसंख्या - 381

21.तच्च जातेरेव न व्यक्तेः – वेदान्तपरिभाषा पृष्ठसंख्या - 291

22.वेदान्तपरिभाषा – पृष्ठसंख्या - 296

23.वेदान्तपरिभाषा- शिखामणिटिप्पणी- पृष्ठसंख्या - 294